# संस्कृतवार्ता:

दिनाङ्क :- 26/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- राज्यसभायां निक्षेपकानां निवेशकानां च कृते उत्तमसंरक्षणं सुनिश्चेतुं तथा च बैङ्क्-मध्ये सेवायाः गुणवत्तां वर्धयितुं च गतवर्षस्य बैंकिंग-विधिः (संशोधनम्) विधेयकं विचारार्थं, अनुमोदनाय च स्वीकृतम्।
- भारतीय-जनता-पार्टीति दलस्य अल्पसङ्ख्यक-पक्षः ईद-पर्वणः पूर्वं अभिलषितेभ्यः मुस्लिम्-परिवारेभ्यः 'सौगत-ए-मोदी' इत्येतस्य अभियानस्य प्रारम्भम् अकरोत्।
- दक्षिणकोरियादेशे अरण्याग्निः कारणेन चतुर्विंशतिजनाः मृताः।
- थाईलैण्डदेशस्य प्रधानमन्त्री पेटोङ्गटार्न् शिनावात्रा अद्य अविश्वासप्रस्तावात् विमुक्ता जाता।
- गुवाहाट्याम्, आई.पी.एल. क्रिकेट्-क्रीडायाम्, अद्य सायङ्काले राजस्थान्-रॉयल्स् इत्येतत् दलं कोलकाता-नाइट्-राइडर्स् इत्येतं दलं सम्मुखीकरिष्यति।

-----------------------------------------

राज्यसभा

राज्यसभायां निक्षेपकानां निवेशकानां च कृते उत्तमसंरक्षणं सुनिश्चेतुं तथा च बैङ्क्-मध्ये सेवायाः गुणवत्तां वर्धयितुं च गतवर्षस्य बैंकिंग-विधिः (संशोधनम्) विधेयकं विचारार्थं, अनुमोदनाय च स्वीकृतम्। विधेयके निदेशक-पदेभ्यः पर्याप्तऋणवृद्धिं पुनर्परिभाषितुम् अपि प्रस्तावः अस्ति, यत् पञ्चलक्षरूप्यकाणां स्थाने द्विकोटिरूप्यकाणि यावत् वर्धितुं शक्यते। विधेयकमिदं वित्तकोषेभ्यः स्वपरिशोधकानां वेतनं निर्णेतुं अधिकारं ददति।

-----------------------------------------

लोकसभा

लोकसभायाम् अस्य वर्षस्य त्रिभुवन-सहकार-विश्वविद्यालय-विधेयकं अनुमोदितम्। विधेयकमिदं त्रिभुवन-सहकार-विश्वविद्यालयः इति नाम्ना प्रसिद्धस्य विश्वविद्यालयस्य रूपेण ग्रामीण-प्रबन्धन-आनन्द-संस्थानस्य स्थापनां कृत्वा तत् राष्ट्रिय-महत्त्वस्य संस्थानरूपेण घोषयितुं प्रयतते। एषा संस्था सहकारीक्षेत्रे प्रौद्योगिकी-प्रबन्धन-शिक्षां प्रशिक्षणं च प्रदास्यति, सहकारी-अनुसन्धानस्य विकासस्य च प्रोत्साहनं करिष्यति तथा 'सहकारेण समृद्धिः' इति दृष्टिं साधयितुं उत्कृष्टतायाः वैश्विकमानकं प्राप्स्यति। एतत् संस्थानां माध्यमेन देशे सहकारी-आन्दोलनम् अपि सुदृढं करिष्यति तथा च संस्थां विश्वविद्यालयस्य विद्यालयेषु अन्यतमम् इति घोषयिष्यति।

------------------------------------------

भाजपा-अल्पसङ्ख्यकपक्ष

भारतीयजनता-पार्टीति दलस्य अल्पसङ्ख्यक-पक्षेन 'सौगात-ए-मोदी' इत्येतद् अभियानं प्रारब्धम्। अस्योद्देश्यम् अशेषे हि देशे द्वात्रिंशल्लक्षं यावत् निर्धनमुस्लिम-परिवारेभ्यः ईदपर्वणः अवसरे विशेषोपहारस्य वितरणं वर्तते। आकाशवाण्या सह वार्ताविधौ भाजपा-अल्पसङ्ख्यक-पक्षस्य राष्ट्रियाध्यक्षः जमाल-सिद्दीकी उक्तवान् यत् पवित्र-रमजानमासस्य, नवरोज़ इत्यस्य भारतीय-नववर्षस्य च सदृशानां आगामि-अवसराणाम् अवधौ अल्पसङ्ख्यक-पक्षः 'सौगात-ए-मोदी' इत्यभियानस्य अन्तर्गतम् अभिलषितानां साहाय्याय प्रयासं करिष्यति।

------------------------------------------

इलाहाबाद-उच्चन्यायालय

सर्वोच्चन्यायालयेन इलाहाबाद-उच्चन्यायालयस्य निर्णयः स्थगितः, उक्तं च यत् अस्मिन् निर्णये संवेदनशीलतायाः अभावो वर्तते। इलाहाबादस्य उच्चन्यायालयस्य विवादपूर्णादेशानुसारेण अनुचितेन स्पर्शेन उत वा वस्त्र-विरूपणेन वा दुष्कर्मस्य प्रयासः न भवति तथा च अभियोजनपक्षेन दुष्कर्मस्य आरोपान् साधयितुं अधिकानि प्रमाणानि प्रस्तूयन्ते इति।

इलाहाबादस्य उच्चन्यायालयस्य मार्च-मासस्य सप्तदश-दिनाङ्कस्य निर्णयस्य विरुद्धं 'वयं भारतस्य महिलाः' इति सङ्घटनेन सर्वोच्चन्यायालये विषयोऽयम् उत्थापितः।

-----------------------------------------

<u>छत्तीसगढ</u>

अद्य छत्तीसगढस्य सुकमा-जनपदे षट्-महिलाभिः सह नव-माओवादिनः आत्मसमर्पणम् अकुर्वन्। तेषां ग्रहणार्थं विंशतिलक्ष-रूप्यकाणां पुरस्कारस्य घोषणा कृता आसीत्। एते माओवादिनः अनेकेषु प्रमुखेषु घटनासु सम्मिलिताः आसन्।

-----------------------------------------

<u>जगदीप धनखड</u>

राज्यसभायाः अध्यक्षः जगदीपधनखडः अद्य उक्तवान् यत् देशे सर्वासु संस्थासु एकत्रीभूय कार्यं कर्तव्यं भवति सहैव अन्वेषणं संतुलनं च भवेत् यस्य अभिप्रायः उचितमेव अस्ति। अध्यक्षेण सदनस्य शून्यहोरा-समये एतद् वक्तव्यं प्रदत्तम्। सहैव असौ दिल्ल्याः उच्चन्यायालयस्य न्यायाधीशस्य यशवन्तवर्मा इत्यस्य निवासस्थानात् प्राप्तधनानां विषये सदनस्य नेतृभिः सह ह्यः जातस्य उपवेशनस्य उल्लेखं कृतवान्। श्रीधनखडः उक्तवान् यत् उपवेशनं सफलम् आसीत् इति विचाराः सर्वसम्मतिपूर्णाः आसन्, ये सहकार्यं चिन्ताश्च प्रतिबिम्बयन्ति।

-----------------------------------------

<u>अश्विनी-वैष्णव</u>

सूचनाप्रसारणमन्त्री अश्विनी-वैष्णवः उक्तवान् यत् आभासीयमाध्यमैः सम्पद्यमानानां द्यूत-क्रियाकलापानां निवारणे महत्त्वपूर्णः परिष्कारः अभवत्, भारतीय-अन्तर्जालीयापराध-समन्वय-केन्द्रस्य प्रतिवेदनानाम् अनन्तरं प्रशासनेन सूचनाप्रौद्योगिकी-मध्यस्थ-नियमानुसारं दशाधिक चतुःशतोत्तरैक-सहस्रं यावत् आभासीय-क्रीडास्थलानि अवरुद्धानि सन्ति। अद्य लोकसभायां पूरकपत्राणाम् उत्तरं ददन् श्रीवैष्णवः अवदत् यत् द्यूतं राज्यसूच्याः भागः अस्ति तथा च राज्यप्रशासनस्य पार्श्वे तस्य कृते विधायिरूपरेखां निर्मातुम् अधिकारो वर्तते।

------------------------------------------

<u>दक्षिणकोरिया</u>

दक्षिणकोरियादेशे वनस्य अग्निप्रकोपेन दक्षिणपूर्वभागे चतुर्विंशतिजनाः मृताः, षड्विंशतिजनाः व्रणिताः च अभवन्। यत्र व्रणितेषु द्वादशजनानां स्थितिः गभीरा वर्तते। आन्तरिक-सुरक्षा-मन्त्रालयस्य न्यूनतम-दत्तांशानुसारं त्रयोविंशति-सहस्राधिकाः जनाः निष्कासिताः सन्ति। शतशः भवनानि नष्टानि अभवन्। अग्निं निवारयितुं सहस्रशः अग्निशामकाः, प्रायः पञ्चसहस्र-सैन्य-कर्मचारिणः अमेरिकीय- सेनायाः विमानानि च कोरियादेशे नियुक्तानि सन्ति।

------------------------------------------

<u>थाईलैण्ड्-प्रधानमन्त्री</u>

थाईलैण्डदेशस्य प्रधानमन्त्री पेटोङ्गटार्न् शिनावात्रा अद्य अविश्वासप्रस्तावात् विमुक्ता जाता, येन संसदि तस्याः संयुत्याः सामर्थ्यस्य पुष्टिः अभवत्। अविश्वासप्रस्तावः ऊनविंशत्यधिक-त्रिशततः द्विषष्ट्यधिकैकशत-मतदानेन अस्वीकृतः, सप्तजनाः मतदानं न कृतवन्तः। स्थानीय-वार्ता-सञ्चार-माध्यमेन उक्तं यत् थाई-इतिहासस्य कनिष्ठतमायाः प्रधानमन्त्रिणः अष्टत्रिंशत्-वर्षीयायाः शिनावात्रायाः उपरि विपक्षेण आरोपः कृतः यत् सा स्वकीयायाः पितुः पूर्वप्रधानमन्त्रिणः थाक्सिन् शिनावात्रा इत्यस्य नियन्त्रणे अस्ति।

------------------------------------------

<u>खेलो-इण्डिया</u>

दिल्ल्यां खेलो इण्डिया पैराक्रीडायाः सप्तमे दिने भारोत्तोलकः दिनेशबगाडे इत्यनेन सप्तोत्तरैकशत-किलोग्राम-मिते वर्गे स्वर्णपदकं प्राप्तवान्, दिव्येश-लदानीः रजतपदकं प्राप्तवान्, जोगिन्दरसिंहः च कांस्यपदकं प्राप्तवान्। षडशीतिः किलोग्राम-मिते वर्गे भारोत्तोलकः अरुणमोली अरुणागिरी स्वर्णं, प्रभाबेन शियालः रजतपदकं, समिमबेन वोहरा च कांस्यपदकं विजितवान्। तत्रैव पैरा-टेबलटेनिस्-क्रीडायां काजल-मखवाना इत्येषा उपान्त्यचक्रीय द्वन्द्वे

प्रविष्टवती। आकाशवाण्याः सह भाषमाणा सा उक्तवती यत् खेलो इण्डिया पैरा गेम्स् इति प्रतिस्पर्धा इतोप्यधिका दृढाभवत्।

------------------------------------------

<u>आई.पी.एल</u>

आई.पी.एल. क्रिकेट्-क्रीडायाम्, अद्य गुवाहाट्याः बरसापारा-क्रीडाङ्गणे सायङ्काले राजस्थान्-रॉयल्स् इत्येतत् दलं कोलकाता-नाइट्-राइडर्स् इत्येतत् दलं सम्मुखीकरिष्यति। स्पर्धा सायं सार्धसप्तवादने आरप्स्यते। ह्यः अहमदाबादस्य नरेन्द्रमोदी-क्रीडाङ्गणे पञ्जाब-किङ्ग्स-दलेन गुजरात-टाइटन्स-दलम् एकादश-धावनाङ्कैः पराजितम्।

।। इति वार्ताः।।